दशश्लोकी स्तुति

दशश्लोकी स्तुति

सांबो नः कुलदैवतं पशुपते सांब त्वदीया वयं
सांबं स्तौमि सुरासुरोरगगणाः सांबेन संतारिताः |
सांबायास्तु नमो मया विरचितं सांबात्परं नो भजे
सांबस्यानुचरोऽस्म्यहं मम रतिः सांबे परब्रह्मणि || 1 ||

विष्ण्वाद्याश्च पुरत्रयं सुरगणा जेतुं न शक्ताः स्वयं
यं शंभुं भगवन्वयं तु पशवोऽस्माकं त्वमेवेश्वरः |
स्वस्वस्थाननियोजिताः सुमनसः स्वस्था बभूवुस्तत-
-स्तस्मिन्मे हृदयं सुखेन रमतां सांबे परब्रह्मणि || 2 ||

क्षोणी यस्य रथो रथांगयुगळं चंद्रार्कबिंबद्वयं
कोदंडः कनकाचलो हरिरभूद्बाणो विधिः सारथिः |
तूणीरो जलधिर्हयाः श्रुतिचयो मौर्वी भुजंगाधिप-
-स्तस्मिन्मे हृदयं सुखेन रमतां सांबे परब्रह्मणि || 3 ||

येनापादितमंगजांगभसितं दिव्यांगरागैः समं
येन स्वीकृतमब्जसंभवशिरः सौवर्णपात्रैः समं |
येनांगीकृतमच्युतस्य नयनं पूजारविंदैः समं
तस्मिन्मे हृदयं सुखेन रमतां सांबे परब्रह्मणि || 4 ||

गोविंदादधिकं न दैवतमिति प्रोच्चार्य हस्तावुभा-
-वुद्धृत्याथ शिवस्य संनिधिगतो व्यासो मुनीनां वरः |
यस्य स्तंभितपाणिरानतिकृता नंदीश्वरेणाभव-
-त्तस्मिन्मे हृदयं सुखेन रमतां सांबे परब्रह्मणि || 5 ||

आकाशश्चिकुरायते दशदिशाभोगो दुकूलायते
शीतांशुः प्रसवायते स्थिरतरानंदः स्वरूपायते |
वेदांतो निलयायते सुविनयो यस्य स्वभावायते
तस्मिन्मे हृदयं सुखेन रमतां सांबे परब्रह्मणि || 6 ||

विष्णुर्यस्य सहस्रनामनियमादंभोरुहाण्यर्चय-
-न्नेकोनोपचितेषु नेत्रकमलं नैजं पदाब्जद्वये |
संपूज्यासुरसंहतिं विदलयंस्त्रैलोक्यपालोऽभव-
-त्तस्मिन्मे हृदयं सुखेन रमतां सांबे परब्रह्मणि || 7 ||

शौरिं सत्यगिरं वराहवपुषं पादांबुजादर्शने
चक्रे यो दयया समस्तजगतां नाथं शिरोदर्शने |
मिथ्यावाचमपूज्यमेव सततं हंसस्वरूपं विधिं
तस्मिन्मे हृदयं सुखेन रमतां सांबे परब्रह्मणि || 8 ||

यस्यासंधरणीजलाग्निपवनव्योमार्कचंद्रादयो
विख्यातास्तनवोऽष्टधा परिणता नान्यत्ततो वर्तते |
ओंकारार्थविवेचनी श्रुतिरियं चाचष्ट तुर्यं शिवं
तस्मिन्मे हृदयं सुखेन रमतां सांबे परब्रह्मणि || 9 ||

विष्णुब्रह्मसुराधिपप्रभृतयः सर्वेऽपि देवा यदा
संभूताज्जलधेर्विषात्परिभवं प्राप्तास्तदा सत्वरं |
तानार्तांशरणागतानिति सुरान्योऽरक्षदर्धक्षणा-
-त्तस्मिन्मे हृदयं सुखेन रमतां सांबे परब्रह्मणि || 10 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ दशश्लोकीस्तुतिः संपूर्णा ||